RKMVU/Int MA/San/12–14+10–15+11–16/J2014/SK– 126

# SK– 126 – भगवद्गीताभाष्ये त्रयोदशाष्टादशाध्यायौ

कालावधिः – होराद्वयम् | पूर्णाङ्काः – 50

==========================================

**A. सप्तसु पञ्चानां रिक्तस्थानं पूरयत। 1x5=5**

1) य एवं ----- अभिजायते।

2) ध्यानेन ----कर्मयोगेन चापरे।

3) यथा प्रकाशयति ------- भारत।

4) अनिष्टमिष्टं ----- क्वचित्।

5) ज्ञानं ------ तान्यपि।

6) न तदस्ति -------त्रिभिःगुणैः।

7) श्रेयान्स्वधर्मो ------किल्बिषम्।

**B. सप्तसु पञ्चानाम् उत्तरं वाक्येन वाक्याभ्यां वा लिखत। 1x5=5**

1) "ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना" कोऽर्थ:?

2) कर्मणि क: अधिकृतो भवेत्?

3) मनीषिणां पावनानि कानि?

4) अविद्या कस्य इत्यस्य प्रश्नस्य उत्तरं किम्?

5) किं नाम सात्त्विकं ज्ञानम्?

6) कः ब्रह्मभूयाय कल्पते?

7) यज्ञदानतपःकर्म न त्याज्यमित्यत्र किं कारणम्?

**C. यथाग्रन्थं सप्तसु पञ्चानाम् उत्तरं लिखत। 2x5=10**

1) "न विधिप्रतिषेधशास्त्रं तावत् फलहेतुभ्याम् आत्मनः अन्यत्वदर्शिनो भवति" यथाभाष्यं निरूपयत।

2) विनश्यत्स्वविनस्यन्तमित्यत्र षड्भावविकाराभावमुपपादयत।

3) कार्यकरणकर्तृत्वे प्रकृतिः हेतुः, भाष्यमतमुपस्थापयत।

4) अनादी इत्यत्र तत्पुरुषसमासग्रहणे को दोषः।

5) सांख्याः कानि चतुर्विंशतितत्त्वानि आचक्षते इत्याचार्यैरुक्तम्।

6) क्षेत्रज्ञस्य उपद्रष्टा इति शब्दस्यार्थं निरूपयत।

7) आत्मविस्तारदर्शनं कथमिति भाष्यकृता उक्तम्।

**D. त्रिषु द्वयोः भाष्यदिशा लघुटिप्पणीं लिखत। 5x2=10**

1) तामसो हि प्रत्यय आवरणात्मकत्वाद् अविद्या।

2) पञ्चेमानि कारणानि सिद्धये सर्वकर्मणाम्।

3) "सहजं कर्म सदोषमपि न त्यजेत्"।

**E. सप्रमाणं भाष्योक्तदिशा त्रिषु द्वयोः लघूपन्यासं कुरुत। 10x2=20**

1) क्षेत्रज्ञञ्चापि मां विद्धि इत्यत्र क्षेत्रज्ञेश्वरैक्ये दोषमुद्भाव्य परिहरत।

2) ज्ञानोत्पत्यनन्तरं जन्म भवति न भवतीति विषयं भाष्यस्वारस्येन विचारयत।

3) विंशतिं ज्ञानसाधनानि भाष्यरसेन परिचाययत।

***

RKMVU/Int MA/San/11-16/J2014/SK-131

**SK-131 – ब्रह्मसूत्रम् 1.1-2**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

=========================================

**A. सप्तसु पञ्चानां रिक्तस्थानं पूरयत। 1x5=5**

1) अस्य महतो-------।

2) अथ य एषः-----।

3) अस्य लोकस्य का गतिः ----।

4) सर्वं खल्विदं ब्रह्म -----।

5) यस्य ब्रह्म च ------।

6) ऋतं पिबन्तौ -----।

7) यः पृथिव्यां ------।

**B. यथेच्छं दश प्रश्नाः वाक्येन वाक्याभ्यां वा समाधेयाः। 1x10=10**

1) प्रस्थानत्रयं किम्? ब्रह्मसूत्रं किं प्रस्थानमुच्यते?

2) सांख्यानां मते आत्मा कीदृशः?

3) अख्यातिवादे अध्यासस्य लक्षणं किम्?

4) भाष्यस्य प्रसिद्धाः टीकाः काः। तत्कर्तारश्च के?

5) तेजेबन्नानाम् ईक्षणं कस्यां श्रुतौ प्रसिद्धम्?

6) गतिसामान्यादित्यत्र केयं गतिर्नाम?

7) प्राचुर्यार्थे मयटः श्रवणं कुत्रोपलभ्यते।

8) प्राणाधिकरणे संशयस्वरूपं किम्?

9) निचाय्यत्वादित्यस्यार्थः कः?

10) गुहाप्रविष्टाधिकरणे विषयवाक्यं कुतः स्वीकृतम्?

11) आनन्दमयाधिकरणे कति सूत्राणि सन्ति? यथेच्छमेकम् उदाहरत।

12) सर्वत्रप्रसिध्यधिकरणस्य पूर्वपक्षः कः?

**C. सप्तसु पञ्चानाम् अल्पाक्षरेण सूत्रार्थविवेचनं कुरुत। 2x5=10**

1) हेयत्वावचनाच्च।
2) विकारशब्दान्नेति चेत् न प्राचुर्यात्।
3) शारीरश्चोभयेऽपि हि भेदेनैनमधीयते।
4) श्रुतोपनिषत्कगत्यभिधानाच्च।
5) सर्वत्र प्रसिद्धोपदेशात्।
6) शास्त्रयोनित्वात्।
7) संभोगप्राप्तिरिति चेन्न वैशेष्यात्।

**D. पञ्चसु यथेच्छं त्रीन् उत्तरत। 5x3=15**

1) जन्माद्यधिकरणम्।
2) ईक्षत्यधिकरणम्।
3) अन्तरधिकरणम्।
4) गुहाप्रविष्टाधिकरणम्।
5) अन्तर्याम्यधिकरणम्।

**E. यथेच्छम् एकं समाधत्त। 10x1=10**

1) आनन्दमयाधिकरणस्थसूत्राणि वृत्तिकारमते व्याख्याय सिद्धान्तिमते प्रपञ्चयत।
2) सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत - वाक्येऽस्मिन् विवक्षितार्थः कः।

***

RKMVU/Int MA/San/09-14,10-15/J2014/SK-133

## **SK**-133 - ब्रह्मसूत्रम् - 2.1,2

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

=====================================

**A. पञ्चानां रिक्तस्थानं पूरयत। 1x5=5**

1) भोक्त्रापत्तेः ___
2) यथा सोम्यैकेन ___ मृत्तिकेत्येव सत्यम्।
3) कृत्स्नप्रसक्तिः ____
4) महद्दीर्घवद्वा ____
5) प्रतिसंख्या ___
6) ___ ज्ञशक्तिवियोगात्।
7) ___ यौगपद्यमन्यथा।

**B. अष्टानां वाक्येन वाक्याभ्यां वा उत्तरं लिखत। 1x8=8**

1) ब्रह्मसूत्रस्य द्वितीयाध्यायः किन्नामधेयः?
2) द्वितीयाध्यायस्य प्रथमपादे कति अधिकरणानि सन्ति?
3) "कार्य-कारणयोः अनन्यत्वम्" इत्यस्य भाष्यकारोक्तोऽर्थः कः?
4) "अश्मादिवच्च तदनुपपत्तिः" इत्यत्र का अनुपपत्तिः?
5) "तत्त्वज्ञानं तु वेदान्तवाक्येभ्य एव भवति"- इत्यत्र किं श्रुतिप्रमाणं भाष्यकारैः प्रदत्तम्?
6) सांख्यमते जगत्कारणं किम्?
7) बौद्धेषु चत्वारः वादिनो भवन्ति। के ते?
8) आर्हतदर्शनानुसारेण किंपरिमाणः जीवः?
9) पञ्चास्तिकायाः के?

10) उत्पत्त्यसम्भवाधिकरणे केषां मतं निराक्रियते?

**C. यथाभिलाषं चतुर्णां लघून्यासं कुरुत। 3x4=12**

1) विलक्षणत्वाधिकरणस्य सर्वाणि सूत्राणि यथाक्रमं विलिख्य समासेन स्वभाषया सिद्धान्तमात्रं समुपस्थाप्यताम्।
2) दृश्यते तु इति सूत्रस्य भाष्यार्थः स्पष्टीक्रियताम्।
3) "न हि साम्ये सति उपकार्योपकारकभावो भवति"– भाष्यवाक्यार्थं स्पष्टीकुरुत।
4) महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् इति सूत्रार्थं संक्षेपेण लिखत।
5) अपरिग्रहाच्चात्यन्तमनपेक्षेति सूत्रार्थसारं स्वभाषया लिखत।
6) "नापि अभावः कस्यचिदुत्पत्तिहेतुः स्यात्" इति भाष्यकारोक्तेः बौद्धमतखण्डनदिशा व्याख्यानं क्रियताम्।

**D. अधिकरणत्रितयस्य भाष्योक्तदिशा लघुटिप्पणीं कुरुत। 5x3=15**

1) इतरव्यपदेशाधिकरणम्॥
2) स्मृत्यधिकरणम्॥
3) रचनाऽनुपपत्त्यधिकरणम्॥
4) अभावाधिकरणम्॥
5) उत्पत्यसम्भवाधिकरणम्॥

**E. एकस्य लघून्यासं कुरुत। 10x1=10**

1) आरम्भणाधिकरणमधिकृत्य कार्यकारणयोरनन्यत्वं ससूत्रं भाष्योक्तदिशा निरूपयत।
2) सांख्य–बौद्ध–जैन–वैशेषिकाणां जगदुत्पत्तिवादं सयुक्तिकं प्रकाशयत।

***

RKMVU/Int MA/San/12-14 & 10-15/J2014/SK-134

## **SK**-134 - ब्रह्मसूत्रम् 2.3-4, 4.1-4

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

=====================================

**A**. **सप्तसु पञ्चानां रिक्तस्थानं पूरयत।** **1x5=5**

1) ------- हृदि हि।

2) प्रतिज्ञाS हानिः--------।

3) -------उपदेशात्।

4) अकरणत्वात् -------।

5) तदधिगम -------।

6) विपर्ययेण तु-------।

7) तदधिगम-------।

**B**. **द्वादशसु दशानां वाक्येन वाक्याभ्यां वा उत्तरत।** **1x10=10**

1) अप्तेजसोः त्रिधा भिन्नम् कार्यं किम्?

2) "देवताधिष्ठितानामेव प्राणानां प्रवृत्तिः" किमत्र प्रमाणम्?

3) प्राणानाम् उत्पत्तिश्रुतिः गौणी न, किमर्थम्?

4) भूतानां लयस्य कः क्रमः? किं तत्र कारणम्?

5) जीवस्य सर्वासु प्रवृत्तिषु ईश्वरो हेतुकर्ता इत्यत्र श्रुतिप्रमाणं दर्शयत।

6) भूतानाम् उत्पत्तिप्रलयौ केन क्रमेण भवतः?

7) "अन्तःकरणमस्तीति अभ्युपगन्तव्यं" तत्र किं सूत्रप्रमाणम्?

8) सदात्मकस्य ब्रह्मणः न कुतश्चिदुत्पत्तिः, कुतः?

9) अग्निहोत्रादीनि किमर्थं प्रवृत्तानि?

10) "प्रतिपत्तव्यफलभावनात्मकाः प्रत्ययाः" इत्यत्र श्रुतिं स्मृतिं वा उदाहरत।

11) उपासनं नाम किम्?

12) श्रवणादि-प्रत्ययावृत्तिं प्रति किं लिंगम्?

**C.** **यथाभिलाषं सप्तसु पञ्चानां सूत्राणाम् अर्थप्रकाशं कुरुत।** **2x5=10**

1) तद्गुणसारत्वात्तद्व्यपदेशः प्राज्ञवत्।
2) कर्ताशास्त्रार्थवत्त्वात्।
3) तेजोऽतस्तथा ह्याह।
4) कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः।
5) मांसादि भौमं यथाशब्दमितरयोश्च।
6) अणवश्च।
7) यत्रैकाग्रता तत्राविशेषात्।

**D.** **पञ्चसु त्रयाणामेव अधिकरणानां भाष्योक्तदिशा लघुटिप्पणीं कुरुत।** **5x3=15**

1) आसीनाधिकरणम्।
2) संज्ञामूर्तिक्लृप्त्यधिकरणम्।
3) वियदधिकरणम्।
4) परायत्ताधिकरणम्।
5) कर्त्रधिकरणम्।

**E.** **द्वयोः एकस्य लघूपन्यासं कुरुत।** **10x1=10**

1) अंशाधिकरणदिशा जीवेश्वरयोः स्वरूपं सम्बन्धं च ससूत्रं वर्णयत।
2) ब्रह्माधिगमे सत्युत्तरपूर्वाघयोरश्लेषविनाशौ भवत इति स्थापयत।

RKMVU/Int MA/San/10-15/J2014/SK-141

## SK-141 – चतुःसूत्री भामतीसहिता

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A. द्वादशसु दशानामुत्तरं लिखत ।** **1x10=10**

1) मङ्गलश्लोकोक्तः द्वितयशब्दार्थः कः?

2) ब्रह्मणः अजिज्ञास्यत्वे हेतुद्वयं किम् ?

3) श्रुतिस्मृतीतिहासपुराणेषु कीदृशमात्मतत्वं गीयते ?

4) तार्किकमते अध्यासस्य लक्षणं किम् ?

5) सर्वानर्थहेतुः कः ?

6) अध्यासस्यानन्तत्वं किमभिप्रायकम् ?

7) अथशब्दार्थः कः ?

8) अर्थान्तरप्रयुक्त एव हि अथशब्दः मङ्गलप्रयोजनो भवतीत्यत्र किमुदाहरणम् ?

9) ज्ञानमुत्पद्यते पुंसां..., कदा ?

10) कर्मफलस्य क्षयिताप्रतिपादकं श्रुतिवाक्यं किम् ?

11) केचित्तु कर्तारः भवन्ति, न भोक्तारः किमुदाहरणमत्र ?

12) प्रथमवर्णकानुसारं शास्त्रयोनित्वस्य विग्रहः कः ?

**B. सप्तसु यथेच्छं पञ्च प्रश्नाः समाधेयाः।** **3x5=15**

1) मङ्गलश्लोकं व्याख्यात ।

2) सन्ति च सहस्राध्यासाः, किमर्थं तद्विना आत्मानात्माध्यासः विचारितः ?

3) लक्षणाभावान्न ब्रह्म जिज्ञासितव्यमित्याक्षेपस्याभिप्रायः कः ?

4) शास्त्रयोनित्वाधिकरणे द्वितीयवर्णकार्थः कः ?

5) “पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्” , ससन्दर्भं तात्पर्यं प्रकाशयत ।

6) अन्यथाख्यातिदिशा अख्यातिमतं निराकुरुत।

7) “सत्यानृते मिथुनीकृत्य” अर्थविशेषं वर्णयत।

**C. पञ्चसु त्रयाणां भामत्युक्तरीत्या ससन्दर्भं तात्पर्यं प्रकाशयत ।** **5x3=15**

1) अध्यासः ।

2) यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रमः ।

3) पश्वादिभिश्चाविशेषात् ।

4) जन्माद्यधिकरणोक्तं जगत् ।

5) आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् ।

**D. द्वयोः एकस्य ग्रन्थोक्तदिशा लघुप्रबन्धं कुरुत ।** **10x1=10**

1) भामतीरीत्या जन्माद्यधिकरणोक्तं ब्रह्मणः लक्षणं विचारयत ।

2) ब्रह्मण अजिज्ञास्यत्वे पूर्वपक्षं सङ्गृह्य स्वसिद्धान्तं समर्थयत ।

***

RKMVU/Int MA/San/12-17/J2014/SK-161

## **SK-161 - वेदान्तसारः**

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

=========================================

**A. द्वादशसु दश समाधत्त।** **1x10=10**

1) आकाशादिकं कस्मादुत्पद्यते।

2) सूक्ष्मशरीरे कति अवयवाः।

3) वेदान्तमते आकाशो नित्यो न वा।

4) अभिमानात्मिकाया अन्तःकरणवृत्तेर्नाम किम्।

5) मनोमयकोशघटकाः के।

6) कर्मरूपः कः।

7) क्रियाशक्तिमान् कः।

8) सूक्ष्मशरीरे के कोशा अन्तर्भवन्ति।

9) विशुद्धसत्त्वप्रधाना इत्यत्र सत्त्वस्य विशुद्धता का।

10) प्राणात्मवादिनो युक्तिः का।

11) उपपत्तिः का।

12) समाधिभेदान् लिखत।

**B. सप्तसु पञ्च समाधत्त।** **3x5=15**

1) चैतन्यस्य जगत्कारणत्वं सोदाहरणं प्रतिपादयत।

2) अन्तःकरणचतुष्टयं लिखित्वा तेषां वृत्तीः लिखत।

3) शमदमोपरतयः विव्रियन्ताम्।

4) ईश्वरादीनां षण्णामुपहितचैतन्यानाम् आन्दाद्यनुभवं विवृणुत।

5) तत्त्वम्पदयोः वाच्यलक्ष्यार्थान् यथाग्रन्थं लिखत।

6) तत्त्वमसीति वाक्ये नीलमुत्पलमिति वाक्यवद्वाक्यार्थः कुतो न संगच्छते।

7) निर्विकल्पकसमाधिसुषुप्त्योः भेदं प्रतिपादयत।

**C. पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) सूक्ष्मभूतोत्पत्तिं वर्णयत।

2) वेदान्तसारस्य सारः लिख्यताम्।

3) अतिप्राकृतादीनां नवानाम् अनुभवान् संकलयत।

4) लक्षणां विशदयत।

5) समाधेः विघ्नान् विव्रिय तन्निवृत्त्युपायान् लिखत।

**D. द्वयोरेकं समाधत्त।** **10x1=10**

1) ईश्वरप्राज्ञौ अवलम्ब्य निबन्धं रचयत।

2) पुत्रादीनामात्मत्वं प्रस्तूय अनात्मत्वमुच्यताम्।

## **SK**-164 - वेदान्तपरिभाषा आगमप्रकरणाद् आन्तं यावत्

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः - 50**

**A. द्वादशसु दश समाधत्त।** **1x10=10**

1) किं वाक्यं प्रमाणम्।
2) अजहल्लक्षणाया लक्षणमुदाहरणं च लिख।
3) लक्षणायां बीजं किमस्ति।
4) वेदान्तसिद्धान्तानुसारं तात्पर्यलक्षणं किमस्ति।
5) अर्थापत्तिप्रमाणस्य नैयायिकाः कुत्रान्तर्भावं कुर्वन्ति।
6) अनुपलब्धिप्रमाणलक्षणं लिखन्तु।
7) श्रुतार्थापत्तिलक्षणमुदाहरणं च लिखत।
8) वेदान्तनये प्रामाण्यं स्वतः परतो वेति।
9) प्रलयभेदान् लिखन्तु।
10) प्राकृतप्रलयः कः।
11) ब्रह्मणो दिनं किमुच्यते।
12) सूक्ष्मशरीरभेदान् लिख।

**B. सप्तसु पञ्च समाधत्त।** **3x5=15**

1) योग्यतालक्षणस्य यथाग्रन्थं व्याख्या कार्या।
2) जहदजहल्लक्षणाविषये साम्प्रदायिकानां मतं लिखन्तु।
3) उपपादकलक्षणं, दृष्टार्थापत्तिस्वरूपं च यथाग्रन्थं लिखन्तु।
4) परतः एवाप्रामाण्यमुत्पद्यते ज्ञायते चेति ग्रन्थस्याशयं प्रतिपादयन्तु।
5) लिङ्गशरीरोत्पत्तिं यथाग्रन्थं प्रतिपादयन्तु।
6) नित्यप्रलयस्य यथाग्रन्थं प्रतिपादनं कुर्वन्तु।
7) तत्प्रतिपत्तौ सृष्टेरुपयोगः कथमिति यथाग्रन्थं प्रतिपादयन्तु।

**C. पञ्चसु त्रीन् समाधत्त। 5x3=15**

1) जहदजहल्लक्षणाविषये ग्रन्थकृन्मते लिखन्तु।

2) अर्थपत्तेः प्रमाणान्तरत्वं साधयन्तु।

3) ज्ञायते च प्रामाण्यं स्वतः इति ग्रन्थस्याशयं लिखन्तु।

4) प्रलयस्य क्रमं यथाग्रन्थं लिखन्तु।

5) न च रूपहीनस्य ब्रह्मणो न प्रतिबिम्बसम्भवः, रूपवत एव तथात्वदर्शनात्...इतिग्रन्थस्य सप्रसङ्गं व्याख्या कार्या।

**D. द्वयोरेकं समाधत्त। 10x1=10**

1) तत्पदवाच्यमीश्वरचैतन्यं मायाप्रतिबिम्बितम्, बिम्बात्मकम्, वेति यथाग्रन्थं विस्तरेण प्रतिपादयन्तु मतद्वयम्।

2) परमतखण्डनपूर्वकं वेदान्तदर्शनाभिमततात्पर्यलक्षणं यथाग्रन्थं प्रतिपादयन्तु।

***

RKMVU/Int MA/San/12-14/J2014/SK-173

**SK-173 - अद्वैतसिद्धिः**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

=======================================

**A. द्वादशसु दशप्रश्नान् वाक्येन वाक्याभ्यां वा उत्तरत। 1x10=10**

1) यदि प्रतिहर्ता अपच्छिद्यात् किं प्रायश्चित्तं विहितम्?

2) तत्सिद्धिपेटिका कस्मिन् शास्त्रे प्रसिद्धा?

3) स्वमते मुख्यार्थत्वे किं प्रयोजकम्?

4) सन् घट इति प्रतीतौ अधिष्ठानतया किं भासते?

5) असञ्जातविरोधित्वात् कस्य प्राबल्यम्?

6) अद्वैतागमेन प्रत्यक्षप्रमाणगतं तात्त्विकं प्रामाण्यमेव बाध्यते, कुतः?

7) सोऽयं देवदत्तः" इत्यत्र का लक्षणा?

8) "अज्ञानत्वं जडत्वमिति पक्षे नात्मनि व्यभिचारः" कुतः?

9) अधिष्ठेयविषमसत्ताकमेव हि तत् भवति, किम्?

10) अनुमानाद्यनिवर्तितदिङ्मोहनादिनिवर्तकं किम्?

11) अनुमानागमापेक्षिताशेषार्थग्राहकं प्रमाणं किम्?

12) "न चात्मस्वरूपं जन्यं ज्ञानं प्रमा" कुतः?

**B. सप्तसु पञ्चानाम् ग्रन्थपङ्क्तीनां सप्रसङ्गं व्याख्यानं लिखत। 3x5=15**

1) निश्चितप्रामाण्यमेव प्रत्यक्षमितरबाधकं भवेत्।

2) सज्ञेयत्वं तावज्ज्ञेयजन्यत्वं वा? ज्ञेयव्याप्यत्वं वा?

3) "ननु प्रमाभ्रमभिन्नं न ज्ञानं न चात्मस्वरूपं ज्ञानं प्रमा तद्विषयस्याविद्यादेस्तात्त्विकत्वापातात्"।

4) त्वयापि प्रत्यक्षाविरोधाय तत्त्वम्पदार्थयोर्लक्षणा नोच्येत।

5) ननु प्रत्यक्षमनुमानाद्यपेक्षया जात्यैव प्रबलम्।

6) सत्ताजातिस्फुरणनिबन्धनं वा? स्वरूपसत्वनिबन्धनं वा? कालत्रयाबाध्यत्वनिबन्धनं वा?

7) अन्यथा सत्यं ज्ञानम् इत्यधिष्ठानुवेधः एव स्यात्।

**C. पञ्चसु त्रयाणां लघुटिप्पणीं लिखत। 5x3=15**

1) असञ्ज्ञातविरोधित्वम्।

2) ज्ञातृजन्यत्वम्, ज्ञातृव्याप्यत्वम्, ज्ञातृसमवेतत्वम्।

3) सन् घटः इति प्रत्यक्षेऽ धिष्ठानानुवेधः।

4) सामान्यविशेषन्यायः।

5) प्रत्यक्षस्य लिङ्गबाध्यत्वविचारः।

**D. ग्रन्थोक्तदिशा द्वयोरेकस्य लघुप्रबन्धं कुरुत। 10x1=10**

1) जात्युपक्रमादिन्यायैः प्रत्यक्षस्य प्राबल्यमिति मतं खण्डयत।

2) जडत्वहेतुं विचारयत।

***

RKMVU/Int MA/San/12-14/J2014/SK-176

## **SK**-176 – तत्त्वप्रदीपिका

(प्रथमपरिच्छेदे आदितः तमसो भावत्वविचारं विहाय विषयविषयीभावप्रत्यादेशान्तम्)

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A. पञ्चदश प्रश्नाः समाधेयाः।** **1x15=15**

1) चित्सुखाचार्यस्य गुरोर्नाम किम्?

2) व्यवहारविषयत्वे सति ज्ञानाविषयत्वमिति स्वप्रकाशत्वलक्षणे को दोषः?

3) अनुभूतिः स्वयम्प्रकाशा अनुभूतित्वात् इति प्रयोगे हेतोः कुतो न स्वरूपासिद्धिः?

4) भूमिः शशविषाणोल्लिखिता भूमित्वात् इत्यनुमाने को दोषः?

5) स्वप्रकाशत्वलक्षणे योग्यत्वपदस्य कुत्र तात्पर्यम्?

6) यद्विपर्यये असमीहितप्रसक्तिस्तत्क्वचिन्मानयोग्यम् - कस्योक्तिरियम्?

7) काल्पनिकधर्माणां संसारदशायाम् अभ्युपगतिख्यापकं सुरेश्वरवार्तिकं लिखत।

8) अनुभूतिः अनुभाव्या न भवति अनुभूतित्वात् इत्याद्यनुमानस्य पूर्वपक्षिप्रदर्शितः प्रतिप्रयोगः कः?

9) आत्मनः संविद्रूपत्वं ख्यापयितुं नैयायिकान् प्रति सिद्धान्तिप्रदर्शितमनुमानं किम्?

10) दुःखादिवत् आत्मनः ज्ञानरूपत्वाभावेऽपि स्वसत्तायां ज्ञानाव्यभिचारत्वाङ्गीकारे को दोषः?

11) आत्मनः स्वप्रकाशत्वख्यापकं हेतुत्रयं लिखत?

12) संवेदिता संविदाश्रयतया अपरोक्षो न भवति अपरोक्षत्वात् इत्यनुमाने को विपक्षबाधकस्तर्कः?

13) ज्ञाननिवर्त्यत्वमिति मिथ्यात्वलक्षणे को दोषः?

14) न हिंस्यात् सर्वा भूतानि इति श्रुतेः अपवादभूतं श्रुतिवाक्यं किम्?

15) मिथ्यात्वे अनुमानप्रमाणख्यापिका चित्सुखकारिका का?

16) संवृतेर्न तु सत्यत्वं सत्यभेदः कुतोऽन्वयम् - श्लोकोऽयं कुत उद्धृतः?

17) सोऽयं देवदत्तः इत्यत्र तत्तायां इन्द्रियेण सह संयुक्तविशेषणतालक्षणसन्निकर्षाङ्गीकारे को दोषः?

18) संविदि योऽर्थोऽवभासते – इत्यत्र संविदीति सप्तम्या अधिकरणविवक्षायां को दोषः?

**B. यथेच्छं पञ्च समाधत्त। 3x5=15**

1) येन मनःसंयोगेन घटानुभुतिर्जनिता तेनैवानुव्यवसायस्यापि जन्म इति पक्षे दोषान् आलोचयत।

2) न च योगिप्रत्यक्षगम्यतया अपरोक्षत्वं धर्मादीनाम् – व्याख्यात।

3) तत्र च नोपाधिः सम्भवति, साधनाव्यापकत्वस्य वक्तुमशक्यत्वात् - व्याख्यात।

4) अकर्मत्वादात्मनः स्वप्रकाशत्वं समासेन विवृणुत।

5) न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते – सिद्धान्तानुसारं सामानाधिकरण्येन वैयधिकरण्येन च व्याख्यात।

6) विवादपदं मिथ्या दृश्यत्वात् शुक्तिरूप्यवत् इत्यनुमाने पूर्वपक्षिकल्पितान् दोषान् विवृणुत।

7) सर्वेषामपि भावानामिति कारिकामुल्लिख्य मिथ्यात्वानुमानं प्रदर्श्य उदाहरणे समन्वयं प्रदर्शयत।

**C. यथेच्छं द्वयमुत्तरत। 5x2=10**

1) स्वयंज्योतिष्ट्वादात्मनः स्वप्रकाशत्वं व्याख्यात।

2) ज्ञानज्ञेययोः सम्बन्धानुपपत्तिं यथाशास्त्रमुपपादयत।

3) न चैवं सति दहनसत्यानुमानादेरप्रतिबद्धप्रसरतया कालात्ययापदिष्टकथा सर्वत्रास्तमियात् – सप्रसङ्गं व्याख्यात।

**D. विषयमेकमादाय लघुप्रबन्धं लिखत। 10x1=10**

1) स्वप्रकाशत्वप्रमाणविचारकाले ग्रन्थकृता प्रदर्शितं पूर्वपक्षं विस्तारयत।

2) हेतुत्रयेण आत्मनः स्वप्रकाशत्वं प्रतिपादयत।

RKMVU/Int MA/San/13-18/J2014/SK-209

## **SK**-209 - वैयाकरणसिद्धान्तकौमुद्यां कारकम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

**A. यथेष्टं दशप्रश्नानाम् एकेन वाक्येन उत्तरं लिखत। 1x10=10**

1) प्रातिपदिकार्थः कः ?

2) परिमाणमात्रस्य किमुदाहरणम् ?

3) अभिहिते कर्मणि का विभक्तिः ?

4) कैः अकथितस्य कर्मसंज्ञा भवति ?

5) शत्रूनगमयत्स्वर्गमिति कस्योदाहरणम् ?

6) अभिनिविशश्च इत्यनेन कस्य कर्मसंज्ञा ?

7) जपमनु प्रावर्षत् इत्यस्य कः अर्थः ?

8) कर्ता कः ?

9) जटाभिः तापसः इत्यस्य कोऽर्थः ?

10) का नाम रुचिः ?

11) परिक्रयणं नाम किम् ?

12) नमस्कुर्मो नृसिंहायेत्यस्य कोऽर्थः ?

**B. यथेष्टं पञ्चानां प्रश्नानाम् उत्तरं लिखत। 2x5=10**

1) नियतलिङ्गाः कथं प्रातिपदिकमात्रस्योदाहरणं भवति ?

2) कर्तुरीप्सिततमं कर्मेत्यत्र कर्मग्रहणं किमर्थम् ?

3) बलिं भिक्षते वसुधामित्यत्र कथं कर्मत्वम् ?

4) पापे अभिनिवेशः इति कथम् ?

5) सर्पिषोऽपि स्यादित्यत्र द्वितीया कुतो न ?

6) हेतुकरणयोः कः भेदः ?

7) प्रभ्वादियोगे षष्ठ्यपि साधु। कथम् ?

**C. यथेष्टमेकस्य प्रश्नस्य उत्तरं लिखत। 5x1=5**

1) गतिबुद्धिप्रतयवसानार्थेत्यादि सूत्रस्य अर्थः कः।

2) लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः - अत्र कः सूत्रार्थः?

**D. अष्टसु षट् समाधत्त। 1x6=6**

1) सम्बन्धसामान्ये का विभक्तिः भवति।

2) हिंसार्थकधातूनां कर्मणि शेषे षष्ठीविधायकं सूत्रं किम्।

3) मुरस्य मुरं वा द्विषमित्यत्र केन षष्ठी।

4) चतुर्थी चाशिष्य ... सूत्रं प्रतीकोद्धृतं पूरयत।

5) कस्य आधारः कारकम् अधिकरणसंज्ञो भवति।

6) वैषयिकाधारस्य उदाहरत।

7) निमित्तात् कर्मयोगे इतीह योगः कः।

8) यतश्च निर्धारणमिति का विभक्तयो विधीयन्ते।

**E. चतुर्षु त्रीन् प्रश्नान् समाधत्त। 3x3=9**

1) यवेभ्यो गां वारयति इति उदाहरणम् उपपादयत।

2) पञ्चमी विभक्ते इति सूत्रं व्याख्यात।

3) आधारोऽधिकरणम् इति सूत्रं व्याख्यात।

4) सप्तमीपञ्चम्यौ कारकमध्ये इति सूत्रं व्याख्यात।

**F. द्वयोरेकं समाधत्त। 10x1=10**

1) वारणार्थानामीप्सितः इति सूत्रं व्याख्यात।

2) उभयप्राप्तौ कर्मणि  इति सूत्रं व्याख्यात।

***

RKMVU/Int MA/San/11-16/J2014/SK-216

## SK-216 – वैयाकरणसिद्धान्तकौमुद्यां तद्धितप्रकरणम्

कालावधिः – होराद्वयम्                                                    पूर्णाङ्काः – 50

==========================================

**A. द्वादशसु यथेष्टं दशप्रश्नानाम् एकेन वाक्येन उत्तरं लिखत।** **1x10=10**

1) प्राग्दीव्यतीयाधिकारः कियत्पर्यन्तं भवति?
2) स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् इति सूत्रेण विधीयमानौ नञ्स्नञौ वत्यर्थे कथं न?
3) आदिवृद्धिः कौ बाधेते ?
4) छण्प्रत्ययविधायकं सूत्रं विलिख्य उदाहरणं लिखत?
5) कुलशब्दाद् अपत्येऽर्थे कति रूपाणि भवन्ति, कानि च तानि?
6) तद्राजस्य बहुषु लुक् केन सूत्रेण भवति?
7) डटो मडागमः कथम्?
8) विंशः इत्यत्र कः प्रत्ययः?
9) ज्ञानवानित्यत्र मतोर्मस्य वादेशः केन सूत्रेण?
10) दन्तुरः इत्यत्र कः प्रत्ययः?
11) चाक्षुषम् इत्यस्य अर्थः कः?
12) केभ्यः अव्ययेभ्यः त्यप्प्रत्ययः?

**B. सप्तसु पञ्च समाधत्त।** **3x5=15**

1) दैत्यः  इति रूपं साधयत।
2) कौलटेरः  इति रूपं साधयत।
3) इक्ष्वाकवः  इति रूपं साधयत।
4) कथं तर्हि कौरव्याः पशवः। विवृणुत।
5) यवमान् इति रूपं साधयत।
6) वाग्मी इति रूपं साधयत।
7) पाश्चात्यः इति रूपं साधयत।

**C. पञ्चसु त्रीणि समाधत्त।** **5x3=15**

1) द्विगोर्लुगनपत्ये इति सूत्रं व्याख्यात।

2) मैत्रेयः इति रूपं साधयत।

3) गोत्रावयवात् इति सूत्रं व्याख्यात।

4) ऊर्णाया युस् इति सूत्रं व्याख्यात।

5) एङ् प्राचां देशे इति सूत्रं व्याख्यात।

**D. द्वयोः एकं समाधत्त।** **10x1=10**

1) तस्येदमित्यपत्येऽपीति कारिकां विवृणुत।

2) तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रं व्याख्यात।

***

## **SK**-225 – सिद्धान्तकौमुद्यां णिजन्तप्रकरणात् लकारार्थप्रकरणं यावत् कृत्यप्रकरणं च

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

**A. पञ्चदश स्वल्पैः शब्दैः समाधत्त 1x15=15**

1) स्रवति इत्यादि सूत्रं पूरयत।
2) औब्जिजत् इत्यत्र उपधादकारस्य वकारः कथम्?
3) तिष्ठतेरित् कीदृशं शास्त्रम्?
4) प्राणिणत् इत्यस्य उभयोः नकारयोः णत्वं कथम्?
5) पिपाविषते इत्यत्र इट्-विधायकं सूत्रं किम्?
6) निसेसिच्यते इत्यत्र षत्वं कथं न?
7) लोहितादिडाज्भ्यः क्यष् सूत्रास्यार्थं लिखत।
8) व्यतिलुनीते इत्यस्य कोऽर्थः?
9) अपाच्चतुष्पाच्छकुनिष्वालेखने इत्यनेन किं विधीयते?
10) कस्मिन्नर्थे अनुपराभ्यां कृञः इत्यनेन आत्मनेपदं विधीयते?
11) अचः कर्मकर्तरि इत्यस्य वृत्तिं लिखत।
12) ‘अपि जानासि कृष्ण, यद्वने अभ्युञ्महि’ इत्यत्र कुतो न लृट्?
13) ‘नन्वोर्विभाषा’ इति सूत्रेण किं विधीयते?
14) ‘यच्चयत्रयोः’ अनेन कस्मिन् अर्थे को लकारः विधीयते?
15) ‘त्वं कन्यां वहेः’ इत्यत्र लिङ् केन? वाक्यर्थश्च कः?
16) ओणेः ऋदित्करणं कुतः?
17) कस्मिन् अर्थे धातोः यङ् भवति?

**B. पञ्चानामुत्तरं लिखत 3x5=15**

1) लियः सम्माननशालिनीकरणयोश्च इति सूत्रं व्याख्यात।
2) निमित्तापाये नैमित्तिकस्याप्यपाय इत्यस्य अनित्यत्वं प्रतिपादयत।
3) कर्तरि कर्मव्यतिहारे व्याख्यात।
4) भावार्थकलकारः कथं प्रयुज्यत इति विवृणुत।
5) विभाषा कथमि लिङ् च इति व्याख्यात।
6) एतिस्तुशास्वृदृजुषः क्यप् - व्याख्यात।

**C. एकं रूपं प्रक्रियापुरस्सरं साधयत 5x1=5**

1) अध्यजीगपत्,2) जिघृक्षति।

**D. एकम् उत्तरयत 5x1=5**

1) 'स्यसिच्सीयुट्तासिषु' इति योगं प्रपञ्चयत।
2) 'वाऽसरूपोऽस्त्रियाम्' इति सूत्रं व्याख्यात।

**E. एकम् उत्तरयत** **10x1=10**

1) ओणेदित्करणं किमर्थम्?

2) 'अगीढ्वर्म्' इत्यत्र कति रूपाणि कथञ्च?

***

RKMVU/Int MA/San/13-18/J2014/SK-238

## **SK**-238 - लघुसिद्धान्तकौमुद्यां तिङन्तप्रकरणम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

**A. यथेच्छं द्वादशसु दश प्रश्नान् समाधत्त। 1x10=10**

1) अभ्यासे झशां के आदेशा भवन्ति। किं सूत्रमत्र मानम्।

2) ते प्राग्धातोः, के।

3) अनद्यतने लङ्, भूते भविष्यति वा।

4) इतश्च इति सूत्रस्य वृत्तिं लिखत।

5) कः अधीष्टः।

6) आट्-विधायकं सूत्रमेकं लिखत।

7) नेर्गदनद ... इति सूत्रं पूरयत।

8) शृणु इतीह हेर्लुक् केन सूत्रेण।

9) च्लेरङ् केन सूत्रेण।

10) आम्-विधायकं सूत्रमेकं लिखत।

11) अदो घस्लादेशः कस्मिन् लकारे।

12) अस्तिधातोः लिटि किं रूपम्।

**B. यथेच्छम् दशसु अष्टौ रूपाणि साधयत। 5x8=40**

1) जगाद

2) अव्राजीत्

3) क्रामति

4) ह्वरिष्यति

5) गच्छति

6) एधे

7) एधिताध्वे

8) एधेत

9) पलायते

10) जघास।

***

RKMVU/Int MA/San/10-15/J2014/SK-243

## **SK**-243 - व्याकरणमहाभाष्ये पञ्चमात् सप्तमम् आह्निकं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

**A. पञ्चदश समाधेयाः - 1x15=15**

1) प्लुतस्य प्रगृह्यसंज्ञाभावः कथम्?
2) यदि पुनर्ह्रस्वानामतपराणां प्रगृह्यसंज्ञोच्यते तर्हि का हानिः?
3) योगविभागपक्षे मात् इति योगस्य कोऽर्थः?
4) एकदेशियुक्त्या अन्तशब्दार्थः कः?
5) षट्संज्ञायामुपदेशग्रहणं किमर्थम्?
6) किं नामाव्ययम्?
7) विभाषा द्वितीयातृतीयाभ्यामित्यकृत्वा वाप्रकरणे तीयस्य ङित्सूपसंख्यानमित्युपसंख्यानस्वीकारे को लाभः?
8) अन्वर्थसंज्ञापक्षे सर्वनामानीत्यस्य को विग्रहः?
9) संज्ञा कीदृशी भवेत्?
10) 'शि सर्वनामस्थानं', 'सुडनपुंसकस्य' इति चेद् अनन्तरस्य विधिर्वा इत्यनेन जसः स्थाने सर्वनामस्थानसंज्ञायाः प्रतिषेधः कथं न प्राप्नोति?
11) 'ह्रक्रोरन्यतरस्याम्' इत्यत्र कीदृशी विभाषा?
12) अनपुंसकस्य इत्यत्र कथं समासः?
13) किमर्थं स्वरादीनां पृथग्ग्रहणं, न चादिष्वेव पठ्येरन्?
14) सर्वादीनि इत्यत्र कः समासः, को वा विग्रहः?
15) पदे प्रयोक्तव्ये पदैकादेशप्रयोगस्योदाहरणं किम्?
16) को नाम आगमः?
17) परादौ गुण... इत्यादिवार्तिकं पूरयत।

**B. पञ्च समाधेयाः - 5x5=25**

1) शे इति सूत्रं व्याख्यात।
2) घसंज्ञायां नदीतरे प्रतिषेधो वक्तव्यो न वेति विचारयत।
3) सर्वनामशब्दे णत्वं कथं न?
4) विभाषा दिक्समासे बहुव्रीहौ इति सूत्रं भाष्यदिशा व्याख्यात।
5) न वेति विभाषेत्यत्र समानशब्दप्रतिषेधः कर्तव्यो न वेति विचारयत।
6) अनेकाल्शिदिति व्याख्यात।

**C. एकं प्रश्नं समाधत्त - 1x10=10**

1) ईदूदेद् द्विवचनं प्रगृह्यम् इति सूत्रे द्विवचनविशेषणता विचार्यताम्।
2) कार्यशब्दवादं निरासयत।

***

RKMVU/Int MA/San/10-15/J2014/SK-255

## **SK**-255 - परिभाषेन्दुशेखरे 1-50 परिभाषाः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

=====================================

### **A**. द्वादशसु दशप्रश्नानाम् एकेन वाक्येन उत्तरं लिखत। **1x10=10**

1) कीदृशानि परिभाषारूपाणि परिभाषेन्दुशेखरे व्याख्यायन्ते?
2) नानुबन्धकृतमनेजन्तत्वम् अस्याः ज्ञापकं किम्?
3) यदागमपरिभाषायाः अनित्यत्वज्ञापकं किम्?
4) यत्रानेकविधमान्तर्यं --- इति परिभाषां पूरयत।
5) कीदृशे पदकार्ये गौणमुख्यन्यायप्रवृत्तिः?
6) प्रत्ययग्रहणपरिभाषायां तदाद्यंशः कस्मात् सूत्रात्?
7) स्त्रीप्रत्यये इत्यस्याः अर्थः कः।
8) पदाङ्गाधिकारे तस्य च तदन्तस्य चेति कस्य सूत्रस्य प्रपञ्चः।
9) सर्वो द्वन्द्वः इत्यत्र सर्वशब्देन केषां न ग्रहणम्।
10) विप्रतिषेधसूत्रस्य विधिपक्षाश्रयेण का परिभाषा सिद्धा।
11) विकरणेभ्यो नियमो बलीयान् इत्यस्य ज्ञापकं किम्।
12) अङ्गशब्देनात्र कीदृशस्य निमित्तस्य ग्रहणम्।

### **B**. सप्तसु पञ्चानां प्रश्नानाम् उत्तरं लिखत। **3x5=15**

1) नानुबन्धकृतमनेकाल्त्वम् इति व्याख्यात।
2) कार्यमनुभवन् हि इत्यत्र हि इत्यनेन किं द्योत्यते।
3) स्वं रूपसूत्रेण कथमर्थवद्ग्रहणपरिभाषा ज्ञापिता।
4) कथं प्रत्ययग्रहणपरिभाषा सिद्धा।
5) एकस्मिन्नित्यस्य किं प्रयोजनम्।
6) प्रकृतिवदनुकरणं भवति इति परिभाषां व्याख्यात।
7) परान्नित्यं बलवत् इति परिभाषां व्याख्यात।

**C. पञ्चसु त्रयाणां प्रश्नानाम् उत्तरं लिखत।** **5x3=15**

1) व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणम् इति परिभाषां व्याख्यात।

2) कृत्रिमाकृत्रिमयोः कृत्रिमस्येव ग्रहणम् इत्यस्य बीजं किम्।

3) भाव्यमानेन सवर्णानां ग्रहणं न इति परिभाषां व्याख्यात।

4) व्यपदेशिवदेकस्मिन्नित्यत्र कैयटमतमनूद्य खण्डयत।

5) विप्रतिषेधसूत्रस्य विधित्वनियमत्वविषये कैयटमतं नागेशदिशा खण्डयत।

**D. द्वयोः एकम् उपन्यसत।** **10x1=10**

1) यदागमपरिभाषासिद्धिप्रकारं वर्णयित्वा वर्णग्रहणे अस्याः प्रवृत्तिं निरूपयत।

2) पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन इत्यत्र नागेशमतं सप्रमाणं विशदयत।

***

RKMVU/Int MA/San/09-14/J2014/SK-266

## SK-266 - लघुशब्देन्दुशेखरे अजन्तप्रकरणम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

**A. यथेष्टं दश समाधत्त। 1x10=10**

1) प्रत्ययान्तेष्वित्यस्य कृदाद्यन्तेषु इति कुतः न ?

2) स्वातन्त्र्येणेति विशेषणमर्थवतः किमर्थम् ?

3) धातुभ्यः कुतः न सुप् ?

4) लिङ्गविशिष्टपरिभाषायाः प्रातिपदिकसामान्ये प्रवृत्तौ किं लिङ्गम्।

5) द्व्येकयोरित्यत्र तयोः संख्यापरत्वं कुतः।

6) तन्त्रं कतिधा कानि च तानि।

7) न विभक्ताविति कस्य निषेधः।

8) हे हरेत्यादौ कुतो न सन्निपातपरिभाषाप्रवृत्तिः।

9) टाङसिङसामित्यत्र भाष्योक्तपक्षान्तरार्थः कः।

10) आमीति न्यासे कृतेऽपि दीर्घे कथं ह्रस्वान्तनुट्प्रवृत्तिः।

11) अपदान्तस्येत्यत्र मूर्धन्यग्रहणं किमर्थम्।

12) नागेशमते शीत्यस्य सर्वादेशत्वं कथम्।

**B. यथेष्टं पञ्चानां प्रश्नानाम् उत्तरं लिखत। 3x5=15**

1) अप्रत्ययग्रहणं कथं भाष्ये प्रत्याख्यातम् ?

2) प्रत्यय इति महासंज्ञा।

3) विभक्तिप्रदेशेषु कुतः सुप्तिङ्व्यवहारः न शक्यः।

4) धातुषु कुतो नैकशेषः।

5) तस्माच्छसो न पुंसि इति सूत्रं व्याख्यात।

6) पदां दतामित्यादौ कुतो नातिप्रसङ्गः।

7) सर्वविश्वयोः एकवचनद्विवचनबहुवचनव्यवहारः कथम्।

**C. यथेष्टं त्रयाणां प्रश्नानाम् उत्तरं लिखत।** **5x3=15**

1) प्रत्ययः इति सूत्रं व्याख्यात।

2) ङ्याबित्यत्र लिङ्गविशिष्टपरिभाषाप्रवृत्तिः कथमिति व्याख्यात।

3) सम्बुद्ध्याक्षिप्तस्यैव।ग्रन्थदिशा वर्णयत।

4) ह्रस्वनद्यापो नुट् इति सूत्रं ग्रन्थदिशा व्याख्यात।

5) जसः शी इत्यत्र अनेकाल्त्वात् सर्वादिशः इत्यस्य खण्डनम्।

**D. द्वयोरेकमुपन्यसत।** **10x1=10**

1) सरूपाणामेकशेष एकविभक्तौ इति सूत्रे तन्त्रेणैव सिद्धम् इत्यस्य खण्डनम्।

2) नामि इति सूत्रं ग्रन्थदिशा व्याख्यात।

***

RKMVU/Int MA/San/09–14 & 10–15/J2014/SK–268

## **SK**–268 – लघुशब्देन्दुशेखरे स्त्रीप्रत्ययप्रकरणम् अव्ययीभावसमासश्च

**कालावधिः – होराद्वयम्** **पूर्णाङ्काः – 50**

==========================================

**A. द्वादशसु दश समाधत्त।** **1x10=10**

1) 'अजादिराकृतिगणः' इति स्वीकारेण किं सिध्यति।

2) अनन्तबहुव्रीहेः स्त्रीलिङ्गे कति रूपाणि भवन्ति।

3) 'निःस्वका' इत्यस्य को विग्रहः, कप्रत्ययश्च कस्मिन्नर्थे वर्तते।

4) 'न ल्यपि' इति सूत्रं किं किं ज्ञापयति।

5) 'नर्तकी' इत्यत्र कः स्त्रीप्रत्ययः।

6) 'अन्यतो ङीष्' इति सूत्रेऽनुवृत्तस्य 'वर्णात्' इत्यस्य किं प्रयोजनम्।

7) मूर्तिः का भवति।

8) 'इतो मनुष्यजातेः' इति सूत्रे 'इतः' इत्यस्य किं प्रयोजनम्।

9) 'नदीभिश्च' इत्यत्र नदीपदेन कस्य ग्रहणम्।

10) 'समर्थः पदविधिः' इत्यस्य प्रयोजनं किमस्ति।

11) 'अन्यपदार्थे च संज्ञायाम्' इत्यनेन विधीयमानसमासो नित्योऽनित्यो वेति।

12) 'अव्ययम्' इति योगविभागस्य किं प्रयोजनम्।

**B. सप्तसु पञ्च समाधत्त।** **3x5=15**

1) बहुव्रीहौ वा इति वार्तिकस्य व्याख्यानं कुरुत।

2) सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम् इत्यस्याशयं लिखन्तु।

3) षः प्रत्ययस्य इत्यस्य व्याख्या कार्या।

4) उरूत्तरपदीदौपम्ये इत्यस्य व्याख्या कार्या।

5) समाससंज्ञा अव्ययीभावसंज्ञा इत्यनयोः कथं समावेश इति लिखन्तु।

6) 'यथाऽसादृश्ये' इत्यस्य भट्टोजिदीक्षितानुसारं सपदकृत्यं व्याख्या कार्या।

7) 'निकषा लङ्काम्' 'आराद्वनाद्' इत्यत्र तु नाव्ययीभावः, 'अभितः परितः' 'अन्यारात्' इति द्वितीयापञ्चम्योर्विधानसामर्थ्यात् इत्यस्याशयं यथाग्रन्थं लिखन्तु।

**C. पञ्चसु त्रीन् समाधत्त। 5x3=15**

1) स्त्रियाम् इति सूत्रस्य यथाग्रन्थं व्याख्या कार्या।

2) एषा द्वा एतयोस्तु सपूर्वयोर्नेत्त्वम्। अन्तर्वर्तिनीं विभक्तिमाश्रित्य असुपः इति प्रतिषेधात् ग्रन्थस्यास्याशयं लिखन्तु।

3) 'वयसि प्रथमे' इति सूत्रस्य व्याख्या करणीया।

4) 'शार्ङ्गरवाद्यञो ङीन्' इत्यस्याशयं यथाग्रन्थं लिखन्तु।

5) 'इदमेव सूत्रमव्युत्पन्नस्य तदर्थकस्य यथाशब्दस्य सत्त्वे मानम्' इति ग्रन्थस्याशयं लिखन्तु।

**D. द्वयोरेकं समाधत्त। 10x1=10**

1) ''एकविभक्ति चापूर्वनिपाते'' इति सूत्रस्य व्याख्या कर्तव्या।

2) अजाद्यतष्टाप् इत्यस्य यथाग्रन्थं व्याख्या कार्या।

***

RKMVU/Int MA/San/10-15/J2014/SK-271

## **SK**-271 – वैयाकरणभूषणसारे आदितः नामार्थप्रकरणं यावत्

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==============================================

**A. दश समाधेयाः-** **1x10=10**

1) धात्वर्थः कः?
2) कः तिङर्थः?
3) किं नाम धातुत्वम्?
4) वर्तमानत्वं नाम किम्?
5) अद्यतनकालः कतिविधः, के च ते?
6) द्वितीयातृतीयासप्तमीनां कोऽर्थः?
7) कर्तृकारकं कतिविधं, के च ते?
8) जातिः प्रातिपदिकार्थः इत्यत्र शास्त्रीयं प्रमाणं किम्?
9) लिङ्गं प्रातिपदिकार्थः इत्यत्र शास्त्रीयं प्रमाणं प्रतिपादयत।
10) जातिः पदार्थ इति कस्य मतम्?
11) ओदनं पचतीत्यत्र कर्मता कुतः?
12) धातुलक्षणे भ्वादिगणपठितत्वमित्यनुपादाने कुत्र अतिव्याप्तिः?

**B. पञ्च समाधेयाः-** **6x5=30**

1) तिङर्थं निरूपयत।
2) तस्मात्करोतिर्धातोः इत्यत्र तस्मादित्यनेन प्रतिपाद्यमानो हेतुः कः?
3) किं कार्यं पचनीयञ्चेत्यादि दृष्टं हि कृत्स्वपि इत्यत्र अपि इत्यनेन समुच्चिता युक्तिः का?
4) ङिल्लकाराणामर्थान् लिखत।
5) अपादानं विवृणुत।
6) एकः नामार्थ इति मते कः पदार्थः?

**C. एकं प्रश्नं समाधत्त-** **10x1=10**

1) कर्तृकर्मणोराख्यातार्थत्वे किं मानम्?
2) भावनाया आख्यातवाच्यत्वनिरसनपूर्वकं धातुवाच्यत्वं प्रतिपादयत।

***

## **SK**-285 – वैयाकरणसिद्धान्तलघुमञ्जूषा-2

**कालावधिः – होराद्वयम्** **पूर्णाङ्काः – 50**

==========================================

**A. द्वादशसु दश समाधत्त।** **1x10=10**

1) सिद्धस्याभिमुखीभाव.......इति सम्पूर्णकारिकां लिखन्तु।

2) कारकविभक्तीनामर्थः कः।

3) 'साध्यत्वं द्वितीयार्थः' इति केषां मतमस्ति।

4) 'तण्डुलानोदनं पचति' इत्यत्र पचेरर्थः कः।

5) निष्पत्तिमात्रे कर्तृत्वम्.......इति सम्पूर्णां कारिकां लिखन्तु।

6) कायेन दशवक्त्र मुखेन त्रिलोचनः इत्यत्र च केन तृतीया।

7) अभिलषतेरर्थः कः।

8) वृक्षात्पर्णं पतति इत्यत्र धात्वर्थः कः, वाक्यार्थश्च कः।

9) अध्ययनात्पराजयते इत्यत्र धात्वर्थः कः।

10) द्विष्ठोऽप्यसौ......इति सम्पूर्णकारिकां लिखन्तु।

11) अधिकरणभेदान् लिखन्तु।

12) अधीती व्याकरणे इत्यत्र चर्मणि द्वीपिनं हन्ति इत्यत्र च सप्तम्यर्थः कः।

**B. सप्तसु पञ्च समाधत्त।** **3x5=15**

1) विशेषणविशेष्यत्वं पदयोरूपजायते इत्यस्याशयं यथाग्रन्थं प्रतिपादयन्तु।

2) क्रियान्वितप्रत्ययार्थान्वयित्वं कारकत्वम् इत्यस्य यथाग्रन्थं खण्डनं लिखन्तु।

3) यत्तु तत्तत्क्रियानुकूलकृत्याश्रयः कर्ता इति मतमुपस्थाप्य खण्डयन्तु।

4) वाताय कपिला विद्युत्, विप्राय हितम्, प्रजाभ्यः स्वस्ति, इति वाक्यानां व्याख्या कार्या।

5) निमित्तेभ्यः प्रवर्तन्ते सर्वे..... इतिकारिकायाः सप्रसङ्गं व्याख्या कार्या।

6) एवं च षष्ठ्या सम्बन्धो विशेषणत्वं चार्थः, इत्यस्याशयं प्रतिपादयन्तु।

7) परे तु अधिकरणस्य कर्त्राद्यन्वये...इत्यादिग्रन्थभागस्याशयं प्रतिपादयन्तु।

**C. पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) सम्बोधनस्य कर्तृकारकत्वव्यवहारं संसाध्य प्रातिपदिकार्थसूत्रे मात्रग्रहणप्रत्याख्यानप्रकारं लिखन्तु।
2) अत्र द्योतकतापक्षः मुख्यः, ग्रन्थस्यास्याशयं यथाग्रन्थं प्रतिपादयन्तु।
3) जपमनु प्रावर्षत्, सर्पिषोऽपि स्यात्, अपि स्तुयाद्विष्णुम्, इतिवाक्यानां व्याख्या कार्या।
4) धारेरूत्तमर्णः सूत्रस्यास्योदाहरणानां व्याख्या कार्या।
5) सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः इतिकारिकाव्याख्या यथाग्रन्थं कार्या।

**D. द्वयोरेकं समाधत्त।** **10x1=10**

1) स्वाश्रये समवेतानाम्...इतिकारिकाया तात्पर्यं यथाग्रन्थं प्रतिपादयन्तु।
2) कर्तृत्वशक्तिमतः स्वरूपं यथाग्रन्थं लिखन्तु।

***

RKMVU/Int MA/San/11-16/J2014/SK-311

## SK-311 – अर्थसंग्रहः

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

### A. द्वादशसु दशप्रश्नानाम् एकेन वाक्येन उत्तरं लिखत। 1x10=10

1) "अथातो धर्मजिज्ञासा" इत्यत्र अथशब्दस्य कः अर्थः?

2) शास्त्रारम्भसूत्रार्थः कः?

3) प्रत्ययस्य अंशद्वयं किम्?

4) आर्थीभावनायाः लक्षणं किम्?

5) वेदस्य पञ्च प्रकाराः के?

6) सोमेन यजेत इत्यत्र कः वाक्यार्थः?

7) विनियोगविधिः कः?

8) लिङ्गं किम्?

9) सन्दंशः कः?

10) प्रयोगविधिः कः?

11) नियमविधिः कः?

12) विकल्पप्रसक्तौ नञः धात्वर्थेन योगस्य उदाहरणं किम्?

### B. सप्तसु पञ्चानां प्रश्नानाम् उत्तरं लिखत। 3x5=15

1) शाब्दीभावनायाः साधनाकांक्षायां कस्यान्वयः? कथञ्च?

2) विशिष्टविधिः कः? सोदाहरणं दर्शयत?

3) वाक्यं सोदाहरणं निरूपयत?

4) अवान्तरप्रकरणं किम्?

5) अर्थक्रमलक्षणं सोदाहरणं निरूपयत?

6) मन्त्राणां दृष्टार्थकत्वं प्रतिपादयत।

7) नञ्स्वभावः कः? सोदाहरणं निरूपयत।

**C. पञ्चसु त्रयाणां प्रश्नानाम् उत्तरं लिखत।** **5x3=15**

1) आर्थीभावना ।
2) श्रुतिप्रमाणं सप्रपञ्चं निरूपयत।
3) स्थानप्रमाणं वर्णयत।
4) पाठक्रमं निरूपयत।
5) अधिकारविधिः कः? सप्रपञ्चंनिरूपयत ।

**D. द्वयोः एकम् उपन्यसत।** **10x1=10**

1) अर्थसङ्ग्रहदिशा धर्मस्वरूपं वर्णयत।
2) प्रयोगविधिसहकारकानि श्रुत्यादि षड्प्रमाणानि संक्षेपेण विवृणुत।

# SK-331 – साङ्ख्यकारिका योगसूत्रञ्च

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

==========================================

## साङ्ख्ये प्रश्नाः

**A. दश समाधेयाः।** **1x10=10**

1) आधिभौतिकं दुःखं कीदृशम्?
2) प्रमाणस्य सामान्यलक्षणं किम्?
3) दृष्टप्रमाणस्य लक्षणं किम्?
4) ऐतिह्यं के प्रमाणत्वेन स्वीकुर्वन्ति?
5) केवलविकृतयः कति?
6) लोचनस्थम् अञ्जनं कुतो न उपलभ्यते?
7) सत्त्वं किमात्मकम्?
8) सङ्घातपरार्थत्वाद् इत्यस्य कोऽर्थः?
9) सत्कार्यवादे के हेतवः?
10) बुद्धेः असाधारणो व्यापारः कः?
11) वैराग्यं कतिविधम्?
12) तामसाद् अहङ्कारात् कस्य सृष्टिः?

**B. षण्णां विषये लघुटिप्पणी लेख्या।** **2x6=12**

1) आध्यात्मिकदुःखनिवृत्तेर्दृष्टोपायाः,
2) प्रकृतिविकृतयः
3) दृष्टप्रमाणम्
4) सम्भवप्रमाणम्
5) समानाभिहाराद् अनुपलब्धिः
6) प्रतिप्रतिगुणाश्रयविशेषः

7) व्यक्ताव्यक्तज्ञविज्ञानात्

**C. एकं प्रश्नं समाधत्त।** **8x1=8**

1) प्रमाणभेदान् प्रतिपादयत।

2) प्रधानसिद्धेः हेतून् उपन्यस्यत।

## योगसूत्रे प्रश्नाः

**D. त्रिषु द्वौ समाधेयौ।** **4x2=8**

1) तदा द्रष्टुः स्वरूपेऽवस्थानम्।

2) ईश्वरप्रणिधानाद्वा। विशदयत।

3) केषां भावनातः चित्तप्रसादनम्? विशदयत।

**E. त्रिषु द्वौ समाधेयौ।** **6x2=12**

1) योगमतेन प्रमाणानि प्रतिपादयत ।

2) तत्परं पुरुषख्यातेः वैतुष्ण्यम्। भाष्यस्वारस्येन प्रतिपादयत।

3) तत्प्रतिषेधार्थमेकतत्वाभायासः। भाष्यस्वारस्येन व्याख्यात।

***

# SK-343 - तर्कसंग्रहो न्यायबोधिनीसहितः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

==========================================

## A. न्यायबोधिनीदिशा दश समाधत्त। 1x10=10

1) पृथिव्याः निष्कृष्टलक्षणं किम्।
2) आकाशलक्षणे गुणपदस्य किं प्रयोजनम्।
3) आकाशं विभु। कुतः।
4) किं भूतत्वम्।
5) बहिरिन्द्रियग्राह्यविशेषगुणाः के।
6) मनः मूर्तम्, कुतः।
7) मेरोः सन्निहिता दिक् का।
8) काललक्षणे विशेष्यमात्रोपादाने को दोषः।
9) मनोलक्षणे विशेष्यानुपादाने को दोषः। कुतश्च।
10) संख्याग्राहकमिन्द्रियद्वयं लिखत।
11) अनुमितौ करणं किम्।
12) अनुमितौ व्यापारः कः।

## B. न्यायबोधिनीदिशा सप्तसु पञ्च समाधत्त। 3x5=15

1) न्यायबोधिनीकारमते अनुमितिलक्षणमुक्त्वा पदकृत्यं लिखत।
2) शाब्दबोधमाश्रित्य प्रबन्धं रचयत।
3) समवायसम्बन्धमाश्रित्य प्रबन्धं रचयत।
4) अनुपसंहारिणं हेत्वाभासं वर्णयत।
5) उपाधिं निरूपयत।
6) कानि इन्द्रियाणि द्रव्यग्राहकाणि कानि वा गुणग्राहकाणि इति विलिख्य तत्र ज्ञाने कस्य हेतुतेति लिखत।

7) केवलान्वयिनो लिङ्गस्य लक्षणं स्वरूपं च वर्णनीयम्।

**C. न्यायबोधिनीदिशा पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) मूलोक्ते यथार्थानुभवलक्षणे दोषं प्रदर्श्य गोवर्धनमिश्रकृल्लक्षणेन वारयत।

2) सविकल्पकनिर्विकल्पकज्ञाने आश्रित्य न्यायबोधिनीदिशा प्रबन्धं रचयत।

3) अनुमितिपरामर्शयोः विशिष्य कार्यकारणभावं द्विविधमपि लिखत।

4) मूलोक्तं वायोर्लक्षणं परिष्कृत्य दलकृत्यं प्रदर्शयत।

5) सामान्यं निरूपयत ।

**D. न्यायबोधिनीदिशा द्वयोरेकं लिखत।** **10x1=10**

1) पक्षसपक्षविपक्षाणां मूललक्षणानि लिखित्वा निष्कृष्टलक्षणानि च दत्त्वा पक्षस्य प्राचीनमतं खण्डयत।

2) पाके गोवर्धनमिश्राशयेन प्रबन्धं लिखत।

***

RKMVU/Int MA/San/12–17/J2014/SK–343 Supplementary

## SK–343(S) – तर्कसंग्रहो न्यायबोधिनीसहितः

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

========================================

**A. न्यायबोधिनीदिशा दश समाधत्त। 1x10=10**

1) न्यायबोधिनीकारकृतं मङ्गलं लिखत।

2) आकाशस्य किं लक्षणं सम्यक्।

3) किं विभुत्वम्।

4) भूतपदवाच्यानि कानि।

5) मेरोर्व्यवहिता दिक् का।

6) आत्मलक्षणे अधिकरणपदेन को लाभः।

7) मनोलक्षणे उपलब्धिपदार्थः कः।

8) मनोलक्षणे विशेष्यमात्रोपादाने को दोषः। कुतश्च।

9) रूपे विद्यमाना जातिः केन इन्द्रियेण गृह्यते। कुतः।

10) सांसिद्धिकद्रवत्वं कस्मिन् विद्यते।

11) रूपस्य जातिघटितलक्षणे गुणत्वानुपादाने को दोषः। कुतश्च।

12) संयोगनाशकौ द्वौ लिखत।

**B. न्यायबोधिनीदिशा सप्तसु पञ्च समाधत्त। 3x5=15**

1) समग्रान् बुद्धिभेदान् चित्रमुखेन प्रकटयत।

2) न्यायं निरूपयत।

3) हेत्वाभासं न्यायबोधिनीदिशा निरूपयत।

4) विरुद्धहेत्वाभासं वर्णयत।

5) शक्तेरष्टमपदार्थत्वं न्यायबोधिनीदिशा खण्डयत।

6) षड् हेत्वाभासान् लिखित्वा केन हेत्वाभासेन अनुमितिः तत्करणं वा प्रतिबध्यते तल्लिखत।

7) उपमानं निरूपयत।

**C. न्यायबोधिनीदिशा पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) व्यापारविषये लक्षणोदाहरणादिना लघुनिबन्धं रचयत।

2) पूर्वपक्षीयव्याप्तेः परिष्कृतं लक्षणं विलिख्य निरूपितपदात् परवर्तिनो भागस्य पदकृत्यं प्रदर्शयत।

3) समवायिकारणं न्यायबोधिनीदिशा निरूपयत।

4) लक्षणा सभेदं सोदाहरणं निरूप्यताम्।

5) मूलोक्ते पृथिव्या लक्षणे दोषमुद्भाव्य परिष्कृतलक्षणेन परिहरत।

**D. न्यायबोधिनीदिशा द्वयोरेकं लिखत।** **10x1=10**

1) परामर्शस्य मूलकारोक्तलक्षणे दोषं प्रदर्श्य गोवर्धनमिश्रकृल्लक्षणेन वारयत।

2) रूपलक्षणं न्यायबोधिनीदिशा लिखत।

***

# **SK**–345 – न्यायसिद्धान्तमुक्तावल्याम् अनुमानखण्डशब्दखण्डौ

**कालावधिः – होराद्वयम्** **पूर्णाङ्काः – 50**

==========================================

**A. द्वादशसु दश समाधत्त।** **1x10=10**

1) प्राचीननये आधुनिकसङ्केतिते शक्तिरस्ति नवेति।
2) किं नाम विवरणम्।
3) न्यायनये नीलादिपदानां कुत्र शक्तिः, कुत्र च लक्षणा।
4) यौगिकरूढपदस्य लक्षणम्, उदाहरणं च लिखन्तु।
5) आकाङ्क्षा का।
6) नीलघटयोरभेदः इत्यत्र नीलपदस्य घटपदस्य च कुत्र लक्षणा।
7) लक्षणा का, तस्यां बीजं च किमस्ति।
8) पितरौ इत्यस्य, श्वसुरौ इत्यस्य च कुत्र लक्षणा।
9) कति हेत्वाभासाः सन्ति।
10) पक्षता का, पक्षश्च कः।
11) परामर्शस्य लक्षणं किमस्ति।
12) अनैकान्तिकस्य कति भेदाः, के च ते।

**B. सप्तसु पञ्च समाधत्त।** **3x5=15**

1) समाहारद्वन्द्वविषये नव्यनैयायिकानां मतं किमिति यथाग्रन्थं प्रतिपादयन्तु।
2) सिद्धान्तव्याप्तिलक्षणे हेत्वधिकरणञ्च हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यम् इति कथनस्य सार्थक्यं लिखन्तु।
3) अनुमितिं प्रति विशिष्टवैशिष्ट्यावगाहिज्ञानस्य कारणत्वं खण्डयन्तु।
4) व्यवहारेण कथं शक्तिग्रह इति यथाग्रन्थं प्रतिपादयन्तु।
5) वाक्ये लक्षणाऽभावेऽपि गम्भीरायां नद्यां घोषः इत्यादौ कथं बोध इति यथाग्रन्थं लिखन्तु।

6) कर्मधारये नैयायिका लक्षणां स्वीकुर्वन्ति नवेति प्रतिपादयन्तु।

7) साधारणहेत्वाभासस्य सोदाहरणं व्याख्या कार्या।

**C. पञ्चसु त्रीन् समाधत्त। 5x=15**

1) सिद्धान्तलक्षणानुसारं घटः विशिष्टसत्तावान् जातेः इत्यत्रातिव्याप्तिवारणं केनोपायेन भवतीति लिखन्तु।

2) जातौ शक्तिस्वीकर्तृमतं तिरस्कृत्य व्यक्तिशक्तिवादं साधयन्तु।

3) सिद्धान्तलक्षणानुसारम् आत्मा ज्ञानवान् द्रव्यत्वात् इत्यत्रातिव्याप्तिवारणार्थं किं कर्तव्यमिति लिखन्तु।

4) अनुमानप्रक्रियां प्रतिपादयत।

5) सिद्धान्तव्याप्तिलक्षणे अनवच्छेदकत्वानुसरणस्य सार्थक्यं प्रतिपादयन्तु।

